१८-१०-२०१६ SUDHARMA SAMSKRUTHA DAILY Regd. No. KA/SK/MYS-107/2015-17

सामाजिकी कथा :

# गङ्गा



कथाकारः – विद्वान् डा. एच्.वि. नागराजराव्,
गौ।। संपादकः, मैसूरु

तदा बस्यानात् अवतीर्य गङ्गा मार्गं तरीतुं प्रवृत्ता । तदा सहसा कश्चन द्विचक्रिकां धावयन् आगतो युवा ताम् अघट्टयत् । सा पतिता । तस्याः शिरो मार्गपार्श्वस्थिते तीक्ष्णे शिलाग्रे घट्टनां प्राप्य व्रणितम्। क्षणमात्रे रक्तम् अस्रवत्। तत्र धावित्वा तां बाहुभ्याम् उत्थाप्य गङ्गे, गङ्गे इति मोहनो विक्लवः उदैरयत्। किन्तु सा विसंज्ञासीत् । अपघातकारी तु ततः पलायितः। घटनां पश्यता केनापि वणिजा अपघातं कृतवत्याः द्विचक्रिकायाः अङ्कः दृष्टः स्वपुस्तिकायां लिखितश्च । जना बहवो मिलिताः । अपसरत, अपसरतेति तान् दूरे निधाय मोहनः एकां त्रिचक्रिकां स्थापयित्वा तस्यां गङ्गां शाययित्वा समीपस्थं चिकित्सालयम् अनयत् । सुदैवात् तदा वैद्यास्तत्रासन् । चिकित्सालयस्य शुश्रूषकास्ताम् अन्तरनयन्। प्रथमचिकित्सानन्तरं वैद्योत्तमो मोहनम् एवम् अपृच्छत् ।

''व्रणितायाः किं भवान् बन्धुः ?''

''नाहं बन्धुः । किन्तु एकस्मिन्नेव कार्यालये आवां कार्यं कुर्वः। सहोद्योगिनौ।'' इत्यवदत् मोहनः ।

''शीघ्रमेव तस्याः शस्त्रचिकित्सा कर्तव्या। लक्षरूप्यकाणां व्ययो भवेत्'' इत्युक्त्वा वैद्यो मोहनस्य मुखम् ऐक्षत।

''धनस्य चिन्ता मास्तु । अहं तत्रोत्तरदायी । तस्या प्राणाः रक्षणीयाः। तत्र सर्वान् प्रयत्नान् कुरुध्वम्'' इति मोहनोऽब्रवीत् ।

वैद्यस्तदा अन्तर्गतः। तदा तत्रारक्षकाधिकारी आगतः। कार्यालयस्य सहोद्योगिनश्च द्वित्राः आगताः। आरक्षकाधिकारी अवदत्

''अपघाते व्रणिता नारी क्वास्ति ?''

''शस्त्रचिकित्साप्रकोष्ठे वर्तते । वैद्यास्ताम् उपचरन्ति । सा विसंज्ञा । तां रक्षितुं सर्वे प्रयत्नाः कर्तव्या इति मया प्रार्थना कृता'' इति मोहनोऽवदत् ।

''युक्तं कृतम् । मया घटनास्थले विचारणा कृता । अपघातकारणीभूतस्य वाहनस्याङ्को दत्तस्तत्रत्येन वणिजा। अद्यैव तच्चालकं निग्रहीष्यामः ।

# रष्याभारतयोः मैत्री गाढीकृता

नवदिल्ली-शनिवारे गोवाराजधान्यां समायोजितायां ब्रिक्स्शृङ्गसभायां प्रथमे दिन एव भारतं यशस्वि जातमिति कथ्यते । रष्याभारतयोः मध्ये षोडशसन्धयः अङ्गीकृताः। द्वाभ्यां नूतनमित्राभ्यां वरमेकं प्राक्तनं मित्रम्। रष्यादेशः भारतस्य प्राक्तनं मित्रम् । उभयोः विचारधारा एकैव । भयोत्पादनायाः मूलोतनपाटनाय रष्यादेशः सहायः सम्पत्स्यते इत्येतत् स्वागतार्हम् इति प्रधानमन्त्री नरेन्द्रमोदिः अघोषयत्। चीनदेशोऽपि भयोत्पादनां विरुणद्धि इत्येतरपि शृङ्गसभायां स्पष्टमभवत्। ''चीनदेशः वस्तुतः पाकिस्तानस्य भयोत्पादनां प्रोत्साहितवान्। भारतं दुर्बलीकर्तुं सः सततं प्रयतमानः विश्वासार्हो नास्तीति'' कथ्यते । चीनदेशः स्वलाभाय भारतेन सह व्यापारमैत्रीं कांक्षति। किन्तु पाकिस्तानस्य भयोत्पादकतां प्रोत्साहयति इत्येतद् चिन्त्यमेव। रष्याभूखण्डे सर्वदृष्ट्या शक्तिमत्तमो बुभूषन् चीनदेशः अमेरिकादेशेन सह स्पर्धमानोऽस्ति । पाकिस्तानं भयोत्पादकान् लालयति-पालयति, पोषयति-तोषयति। काश्मीर-राज्यस्य एकं खण्डम् अपहृतवान् चीनदेशः तस्यैव खण्डान्तरम् अपहृतवतः पाकिस्तानस्य गाढं मित्रमेवेत्यत्र न द्वापरः। यावन्न भवति मित्रभेदः तावन्न गच्छति भयम्। बलूचिस्तानं भाययितुमपि पाकिस्तानं चीनस्य साहाय्यमपेक्षते। धर्मयुद्धे भारतं सम्मुखयितुम् अशक्नुवन् पाकिस्तानदेशः स्वरक्षायै भयोत्पादकेषु विश्वसिति। रष्याभारतयोः मैत्री विजयताम् इति ब्रूमः।

# जीवनबोधको गुरुः

– विद्वान् डा. टि.वि. सत्यनारायण, मैसूरु
गौ।। संपादकः



गुरुणा सर्वे निजहृदयस्थं देवं पश्यन्ति जानन्ति च।

तदुक्तं विदग्धैः –

**गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भवमुक्तः।**
**सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम्।।** इति । कठोपनिषदि 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत' इति समुपदिष्टम्। वराः ज्ञानिनः आत्माराधकाः दिव्यान्तरङ्गवेदिनः गुरवः एव। अज्ञानिनः वयम् आलस्यं दूरीकृत्य जागृतास्सन्तः गुरोस्सकाशात् सद्विषयान् ज्ञातुं प्रयतेम। यतः –

**इह चेदवेदीन् अथ सत्यमस्ति।**
**न चेदिहावेदीत् महती विनष्टिः।।**

ज्ञानिनः एवमुपादिशन् –

**आनन्दरूपमात्मानम् अज्ञात्वैव पृथग्जनः।**
**बहिस्सुखाय यतते न तु कश्चित् विदन् बुधः।।**
**अज्ञात्वैव हि निक्षेपं भिक्षामटति दुर्मतिः।**
**स्ववेश्मनि निधिं ज्ञात्वा को नु भिक्षामटेत् सुधीः**
**न गच्छति विना पानं व्याधिरौषधशब्दतः।**
**विनाऽपरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते।।** इति

लोके गुरुरूपः ज्ञानदायकः प्रथमः देवः गजाननः। सः विघ्नहर्ता ज्ञानदाता च। द्वितीयः गुरुदेवः साक्षात् दाक्षिणामूर्तिः शिवः।

# आक्रमणं कुरु- ३

-डा. रमाकान्तशुक्लः, नवदिल्ली

अपहृतं विमानं भटशिरांसि
छिन्नानि येन तस्मिन् दुष्टे ।
प्रस्थानकोट मुम्बइ दोषिणि
**आक्रमणं कुरु, आक्रमणं कुरु** ।।१५।।

त्वं शान्तस्तिष्ठसि सम्प्रति यदि
कोटिशो जनानामपमानम् ।
जागृहि जागृहि रे सुप्त सिंह
**आक्रमणं कुरु, आक्रमणं कुरु** ।।१६।।

पूरितो घटः पापानां वै
नैव प्रमाणमधुनाऽपेक्ष्यम् ।
अवलोक्य पुरो विजयादशमीम्
**आक्रमणं कुरु, आक्रमणं कुरु** ।।१७।।

दुर्दृष्ट्या पश्येद्यदि राष्ट्रं
कुत्रापि कश्चिदप्यस्माकम् ।
तत्कृते भव त्वं वज्रपाद
**आक्रमणं कुरु, आक्रमणं कुरु** ।।१८।।

ऋणशेषं रिपुशेषं पावक-
शेषञ्च न कुर्यादिति श्रुतिः ।
मा त्वय्याक्रमणं रिपुः क्रियात्
**आक्रमणं कुरु, आक्रमणं कुरु** ।।१९।।

(अनुवर्तते)

## हासानाम्बादर्शनम्

हासन-अत्र नगराधिदेवता हासनाम्बा। अस्य देवालयस्य वैशिष्ट्यं किमिति चेत्, सदा तस्य द्वाराणि पिहितानि भवन्ति। वर्षे केवलम् एकवारं द्वाराणि उद्घाट्यन्ते, तदैव देव्या दर्शनं लभ्यते भक्तैः। मासस्यास्य विंशतितमदिनाङ्के द्वारापि उद्घाटयिष्यति ।

## कन्नडराज्योत्सवः

बेङ्गळूरु-नवम्बरमासस्य प्रथम दिनाङ्के कर्णाटकराज्ये कन्नड राज्योत्सवः आचरिष्यति। अस्मिन् सन्दर्भे विविधक्षेत्रेषु गणनीयसेवां कृतवन्तः गण्याः सर्वकारेण सम्मानयिष्यन्ति। अस्मिन् वर्षे ५० अधिकाः जनाः राज्यप्रशस्ति प्राप्तवन्तः इति अवगम्यते।

* श्रीरङ्गपत्तनम्- अत्रत्ये श्रीवेदान्त देशिक सभायाः आश्रये ०५-११-२०१६तमे दिनाङ्के शनिवासरे श्री वेदान्ताचार्याणां गन्धहुडि उत्सवः सायं सप्तवादनतः रात्रौ द्वादशवादन पर्यन्तं श्री अभिनववागीश ब्रह्मतन्त्र स्वतन्त्र परकालमठाधीशानां दिव्य सान्निध्ये प्रचलिष्यति। अस्मिन् सन्दर्भे वेद-प्रबन्धपारायणादि कार्यक्रमः प्रचलिष्यन्ति।

*सत्यागालम्-श्रीवेदान्ताचार्याणां उत्सवः कोळ्ळेगाल समीपस्थे सत्यागाले आगामिनि मासस्य द्वितीयदिनाङ्के श्री श्री अभिनव वागीश ब्रह्मतन्त्रपरकाल-मठाधीशानां दिव्य सान्निध्ये प्रचलिष्यति। तमिळुनाडु कर्णाटक राज्यस्य विविधभागतः सहस्राधिकाः जनाः आगमिष्यन्ति।

For kind Attention of our subscribers

*With the sanguine hope that subscription from those who are yet to renew their subscriptions would be forthcoming, we are not discontinuing the supply of Sudharma to them. Those who have not renewed are therefore, requested to renew their subscription at the earliest.*

Edited, Printed & Published by K.V.Sampath Kumar, Prop. Sree Kantha Power Press ; Address ; # 561, 2nd Ramachandra Agrahara, Mysore-570004 Karnataka, INDIA